संस्कृतवार्ता:
10.11.2024
सायम्  - 06:20

<u>मुख्यवार्ताः</u>

- झारखण्डे प्रथमचरणस्य विधानसभानिर्वाचनाभियानम् सजवं प्रवर्तते। सर्वेषां राजनैतिकदलानां नेतारः मतदातृन् आकर्षयितुं पूर्णबलेन कार्यं कुर्वन्ति। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भाजपादलं सर्वदा आदिवासिजनानाम् हिताय  कल्याणाय च कार्यं करोति।
- भारतीयजनतापार्टीदलस्य वरिष्ठनेता तथा केन्द्रीयगृहमन्त्री अमितशाहः अद्य मुम्बईनगरे महाराष्ट्रविधानसभानिर्वाचनार्थं दलस्य घोषणापत्र-संकल्पपत्रं विमोचितवान्।
- जम्मू-कश्मीरस्य श्रीनगरस्य जबरवां क्षेत्रे अथ च बारामूला जनपदस्य सोपोर क्षेत्रे द्वौ आतंकरोधी अभियानौ प्रचलित:।
- कनाडा आरक्षिबलेन हिन्दूमन्दिरे आक्रमणं आलक्ष्य ब्रेम्टननगरे एकान्यजनस्य निगडनम् विहितम्।
- भारत-दक्षिणाफ्रिका-देशयोः मध्ये विंशतिः प्रति विंशतिः क्रिकेट्-क्रीडा स्पर्धायाः द्वितीयं द्वन्द्वं गकेबरहा नगरस्य सेंट जार्ज पार्क इति क्रीडांगणे क्रीडिष्यते। ।

<u>प्रधानमंत्री-झारखण्ड</u>

झारखण्डे प्रथमचरणस्य विधानसभानिर्वाचनाभियानस्य समाप्त्यर्थं केवलं द्वौ दिवसौ अवशिष्टौ। एतादृशे सति सर्वेषां राजनैतिकदलानां नेतारः मतदातृन् आकर्षयितुं पूर्णबलेन कार्यं कुर्वन्ति।  भाजपादलस्य-वरिष्ठनेता च नरेन्द्रमोदी अद्य राज्ये प्रचार-कार्यक्रमे एकां जनसभां सम्बोधितवान्। अद्य अपराह्णे बोकारो-नगरस्य चन्दनक्यारी विधानसभाक्षेत्रे  विजयसंकल्प-अभियानं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् भाजपादलं सर्वदा आदिवासिजनानाम् हिताय  कल्याणाय च कार्यं करोति।

सः अवदत् यत् आदिवासीभ्रातृभगिनीनां आकांक्षा:, स्वाभिमानः च सर्वदा दलस्य कृते सर्वोपरि वर्तते। श्री मोदी प्रोक्तवान् यत् विगतदशवर्षेषु अस्माकं सर्वकारेण त्रिलक्षकोटिरूप्यतोधिकं धनराशिं जनेभ्यः प्रदत्तः। यः काङ्ग्रेसदलस्य अपेक्षया चतुर्गुणाधिकम् वर्तते।  झामुमो-सर्वकारस्य आलोचनां कुर्वन् मोदीमहोदयः अवदत् यत् सोरेन-सर्वकारेण झारखण्डस्य जनानां शोषणं लुण्ठनं च कृतम्।

अस्य प्रत्युत्तरे रांचीनगरे निर्वाचनसभां सम्बोधयन् सोरेन् महोदयः अवदत् यत् जनसमूहः सर्वेषु कार्येषु दृष्टिम् स्थापयति। सममेव ते निर्वाचने भाजपादलस्य कृते समुचितं उत्तरं दास्यन्ति। हेमन्त सोरेन इत्यस्य आरोपस्य खण्डनं कुर्वन् झारखण्डस्य भाजपादलस्य प्रमुखः बाबूलाल मराण्डी प्रोक्तवान् यत् केन्द्रीय संस्थाः निजकार्यं कुर्वन्ति इति।

<u>महाराष्ट्र-मेनिफेस्टो</u>

भारतीयजनतापार्टीदलस्य वरिष्ठनेता तथा केन्द्रीयगृहमन्त्री अमितशाहः अद्य मुम्बईनगरे महाराष्ट्रविधानसभानिर्वाचनार्थं दलस्य घोषणापत्र-संकल्पपत्रं विमोचितवान्। शाहमहोदयः अवदत् यत् भाजपायाः घोषणापत्रं राज्यस्य जनानां आकांक्षाणां प्रतिबिम्बम् अस्ति।

भाजपादलेन सिञ्चनपरियोजनानि, नदीजलवितरणं, प्रावृट् काले अतिरिक्तजलस्य उपयोगः च राज्यं अनावृष्टिमुक्तं कर्तुं स्वघोषणा पत्रे प्रख्यापितम्। अस्मिन् कार्यक्रमे केन्द्रीय मंत्री पीयूष गोयलः, महाराष्ट्रस्य उपमुख्यमंत्री देवेन्द्र फडणवीसः, महाराष्ट्रस्य भाजपादलस्य अध्यक्षः चन्द्रशेखरः भावाकुले, अन्ये च नेतारः उपस्थिताः आसन्।

<u>मनोहर-ईवी कार्यक्रम</u>

केन्द्रीयविद्युतमन्त्री मनोहरलाल: अद्य नवदिल्ल्याम् ध्वजं प्रदर्श्य ई-वाहन माध्यमेन यात्रां कृतवान्। अस्मिन् अवसरे स: 'ईवी एज ए सर्विस' इति कार्यक्रमम् अपि प्रारब्धवान्। अस्मिन् अवसरे मनोहरलालमहोदय: अवदत् यत् एष: कार्यक्रम: एकस्य उदात्त कार्यस्य कृतं आरब्ध:, यस्य देहल्या: कृते बहु आवश्यकता वर्तते। स: प्रदूषणं न्यूनीकर्तुं विद्युत्वाहनानां भूमिकां 'ईवी एज ए सर्विस' कार्यक्रमस्य माध्यमेन महत्त्वं च प्रकाशितवान्।

<u>मांडविया-पदयात्रा</u>

युवा कार्य एवं क्रीडा मन्त्री डॉ. मनसुख माण्डविया छत्तीगढ़स्य जसपुरे बुधवासरे जनजातीय गौरवदिवसावसरे भारतीय-स्वयंसेवकै: सह पत्रयात्रां करिष्यति। अस्मिन् कार्यक्रमे छत्तीसगढस्य मुख्यमन्त्री विष्णुदेव साईं , अन्ये च राज्यमन्त्रिण: भागं ग्रहणं करिष्यन्ति। अस्मिन् अवसरे ते भगवान् बिरसा मुण्डाया: जन्मदिवसावसरे स्मारणं करिष्यन्ति। सममेव तस्य राष्ट्रस्य विकासे आदिवासी समुदायस्य महत्त्वपूर्णं योगदानस्य विषये परिचर्चां करिष्यन्ति।

## इफ्फी

मनोरञ्जनस्य जगतं अधिकं मनोरञ्जकं च कर्तुं इफ्फी भारत- अन्तर्राष्ट्रीयचलच्चित्रमहोत्सवः इत्यनेन IFIesta इत्यस्य आयोजनस्य घोषणा कृता। अस्य उद्देश्यं चलच्चित्रस्य, भोजनस्य, कलानां, अन्तरक्रियाशीलानाम् अनुभवानां च माध्यमेन जनान् संयोजनं वर्तते। IFiesta इत्यस्य आयोजनं नवम्बरमासस्य एकविंशतिः दिनांकतः अष्टाविंशतिः दिनांक पर्यन्तं गोवादेशस्य पणजीनगरस्य कला अकादम्यां भविष्यति। सूचनाप्रसारणमन्त्रालयस्य सूत्रानुसारं प्रतिपादितं यत् अस्मिन्नेव कार्यक्रमे सांस्कृतिककार्यक्रमाणां विस्तृताः श्रृंखलाः आयोजिताः भविष्यन्ति।

## ऋतुविज्ञानविभाग

ऋतुविज्ञानविभागेन अद्य तमिलनाडुनगरे मेघगर्जनेन विद्युताकाशेन च प्रचण्डवृष्टेः सम्भावना प्रकटिता। शुक्रवासरपर्यन्तं केरल, माहे, पुडुचेरी, कराईकल च इत्येतेषु क्षेत्रेषु वर्षा भविष्यति, इति सूच्यते। आगामि दिवसद्वये हिमाचलप्रदेशः, पञ्जाब चेत्येषु राज्येषु सघननीहारस्य सम्भावना वर्तते। तस्मिन् एव काले दिल्ली-राष्ट्रीयराजधानीक्षेत्रे रात्रौ प्रातःकाले च नीहारः, लघुनीहारः च भवितुम् अर्हति ।

## चेन्नई ग्राण्ड मास्टर्स

चतुरङ्गक्रीडायां चेन्नई नगरस्य अन्ना-शताब्दी पुस्तकालये नवम्बर-मासस्य पञ्चदिनांकत: एकादश पर्यन्तं चेन्नै-ग्राण्ड्-मास्टर्स-चतुर्विंशत्याधिकद्विशततम् वर्षस्य क्रीडाया: आयोजनं प्रचलति । यत्र मास्टर्स-चैलेन्जर्स-वर्गयो: आयोजनं प्रचलत:। अमेरिकादेशस्य ग्राण्डमास्टर: लेवोन् एरोनिय: पञ्चमे चक्रे फ्रान्सदेशस्य जीएम मैक्सिन वायियर लाग्रेवम् पराजित्य शीर्ष स्थानं प्राप्तवान्।

## जूडो-ओपन क्रीडा

हाङ्गकाङ्ग-नगरे सीनियर-एशियन-जूडो-ओपन-क्रीडायां भारतेन त्रीणि कांस्यपदकानि विजितानि । एन्जेल् यादवः महिलायाः अष्टचत्वारिंशत् किलोग्रामभारवर्गे, पुरुषाणां षष्टिः किलोग्रामभारवर्गे जतिनः , त्रिसप्ततिः किलोग्रामभारवर्गे सौरभः च कांस्यपदकानि प्राप्तानि।

## क्रिकेट

भारत दक्षिण-अफ्रीका-देशयोः मध्ये विंशतिः प्रति विंशतिः क्रिकेट्-क्रीडा स्पर्धायाः द्वितीयं द्वन्द्वं गकेबरहा नगरस्य सेंट जार्ज पार्क इति क्रीडांगणे क्रीडिष्यते। इयं स्पर्धा अद्य सायं सार्धसप्तवादने क्रीडिष्यते। अस्याः श्रृङ्खलायाः प्रथमे द्वन्दे भारतेन दक्षिण-अफ्रीका दलं एकषष्टिः धावनांकैः पराजितम् । अस्याः श्रृङ्खलायाः तृतीयः द्वन्द्वः बुधवासरे सेन्चुरियन-नगरे, चतुर्थः द्वन्द्वः शुक्रवासरे जोहान्सबर्ग्-नगरे च भविष्यति ।

।।इति वार्ता:।।